International Journal of Sanskrit Research 2015; 1(4): 127-129

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2015; 1(4):127-129
© 2015 IJSR
www.anantaajournal.com
Received:20-05-2015
Accepted: 22-06-2015

**माखनदासः**
**गवेषकःछात्रः।**
**कलिकाताविश्वविद्यालये**
**(संस्कृतविभागे)।**

**Correspondence**
**माखनदासः**
**गवेषकःछात्रः।**

# वर्तमाने समाजे संस्कृतस्य गुरुत्वम्

**माखनदासः**

वर्तमानसमाजे संस्कृतस्य अवदानं स्वीकार्यम् । जन्मनः मृत्युपर्यन्तं, प्रातःकालतः शय्याग्रहणपर्यन्तं संस्कृतम् अस्माकं जीवने प्राणवायुः (अक्सिजेन) इव विद्यते । संस्कृतशब्दस्य व्युत्पत्तिः – सम् पूर्वकं कृ धातोः क्त प्रत्ययात् । यस्यार्थः – शोधनं, परिष्कृतं, विशुद्धरूपेणप्रस्तुतकरणं वा । संस्कृतम् अस्माकं जीवनं सुन्दरं करोति, परन्तु संस्कृतं वर्तमानसमाजे एका अप्रचलिता भाषा । इदानीम् एतस्य व्यवहारमपि न प्रचलितं तथापि केन प्रकारेण समाजे एतस्य प्रयोजनीयता, आवश्यकता लक्ष्यते? उत्तरे केनापि उच्यते – वर्तमाने ये संस्काराः सन्ति यथा – जातकर्म, नामकरणम्, उपनयनं, चूडाकर्म, विवाहः, श्राद्धं चेति एतानि कार्याणि संस्कृतं विना न सम्भवन्ति । पुनः प्रश्नः भवति – हिन्दुजनानां संस्कारेषु संस्कृतमन्त्रस्य प्रयोजनं किन्तु समाजस्य अन्यसम्प्रदायानां जनानां संस्कारेषु संस्कृतमन्त्रस्य प्रयोजनं नास्ति, तर्हि एतेषां जनानां जीवने संस्कृतस्य प्रयोजनीयता किम् ? क्रीडालुः, डाक्तारः, आइनजीवी, राजनीतिविदः एतेषां जीवने संस्कृतस्य प्रयोजनं किम् ? किमर्थं संस्कृतस्य आवश्यकता ? उत्तरे, वर्तमानसमये दैनन्दिन जीवने वा जनाः यानि कार्याणि कुर्वन्ति, उपदेशाः पालयन्ति, एतेषां प्रचलनं, आविष्कारः वा संस्कृतयुगे अभवत् । अतः एतेषां सम्यक् ज्ञानार्थं संस्कृतस्य प्रयोजनीयता अस्ति ।

**प्राचीनभारतीयेतिहासस्य ज्ञानम्** – वर्तमाने प्राचीनभारतीयेतिहासस्य सम्यक् ज्ञानार्थं संस्कृतस्य प्रयोजनीयता अतीव गुरुत्वपूर्णा । कश्चन प्रश्नं करोति – प्राचीनभारतस्य इतिहासज्ञानार्थम् इतिहासपुस्तकं मिलति । इतिहासपुस्तकेन ज्ञायते, संस्कृतस्य प्रयोजनं किम् ? उत्तरे अधुनापि प्राचीनभारतस्य बहुतथ्यं, काव्यं, नाटकं च मिलति, येन पाठोद्धारेण प्राचीनकालस्य समाजव्यवस्था, आचार-व्यवहारः, खाद्याभासः, व्यवसाय-बाणिज्यं, धर्मः, युद्धयात्रा, बहिर्विश्वेन सह योगायोगं ज्ञातुं शक्यते । येन नूतनतथ्योद्धारेण प्रचारितेतिहासस्य परिवर्तनं भवितुं शक्नोति । उदाहरणस्वरूपम् – भासस्य नाटकानि, यैः नाटकैः भासस्य कालम् अनुमीयते । अपिच, सर्वेशिक्षिताः जनाः जानन्ति 1902 खीष्टाब्दे जगदीशचन्द्रः तस्य “Response in the living and non-living” ग्रन्थे उद्भिदां प्राणाः सन्ति इति लिखितवान् परन्तु मनुसंहितायां मनुः 2100 वत्सरेभ्यः पूर्वम् उक्तवान् -

“अन्तःसज्ञा भवन्त्येते सुख-दुःख समन्विताः”। (मनुसंहिता 1.49)

अर्थात् वृक्षादीनाम् अन्तःचेतना अनुभवशक्तिः वा अस्ति एतेषां जीवनमपि सुखदुःखेन समन्वितः । अस्य ज्ञानार्थं संस्कृतस्य पठनम् आवश्यकम् ।

**ज्योतिषशास्त्रम्** – वर्तमाने जनाः विपदि स्वरक्षणार्थं ज्योतिषिकसमीपे गच्छन्ति । सः ज्योतिषिकः जनेभ्यः विभिन्नोपदेशान् ददाति, राशिगणनां, कोष्ठीगणनां च करोति । अधुनापि अस्माकं राष्ट्रनेतारः शपथग्रहणं, विभिन्नकार्यं च ज्योतिषस्य निर्देशं विना न करोति । परन्तु प्राचीनकाले एतस्य ज्योतिष शास्त्रस्य उत्पत्तिः अभवत् । प्राचीनकाले राजतन्त्रस्य राजन्यवर्गाः, प्रभावशालिजनाः अस्य ज्योतिषशास्त्रस्य पोषकाः आसन् । अस्य शास्त्रस्य आलोच्यविषयः ग्रहनक्षत्रादिज्योतिष्कानां पदार्थानाम् आवर्तनं, मानवजीवनस्य तथा पृथिव्याः उपरि तेषां प्रभावानुसन्धानं, तज्जनिता शुभाशुभफलगणना च । षडवेदाङ्गेषु ज्योतिषशास्त्रम् इति नाम्ना एकं वेदाङ्गशास्त्रम् आसीत् । विष्णुगुप्त-देवस्वामि-जीवशर्म-सत्याचार्य-पृथु-शक्तिपूर्व-सिद्धसेन-मनित्थयवनाचार्याः अस्मिन्शास्त्रे प्राचीनाचार्याः आसन् । वराहमिहिरः फलितज्योतिषस्य बहून् ग्रन्थान् विरचितवान् । यथा –1) वृहत्संहिता 2) वृहत्विवाहपटलः, 3) पल्लवविवाहपटलः 4) वृहज्जातकः 5) लघुजातकः च ।

**शून्यस्य आविष्कारः** – दैनन्दिनजीवने शून्यं (0) विना अस्माकं जीवनं शून्यं, परन्तु शून्यम् आर्यभट्टः संस्कृतयुगे आविष्कारं कृतवान् । वर्तमाने गाणितिक पद्धतिः, पूर्णसंख्या, दशमिकपद्धतिश्च प्रचलिता । परन्तु, प्राचीनकाले वैदिकयागयज्ञाय वेदिभ्यः वा रेखागणितविषयकधारणायाः सृष्टिः अभवत् । विविधशूल्वसूत्रेषु प्राचीनगाणितिकपद्धतीनां सूचना मिलति । अपिच पूर्णसंख्या, दशमिकपद्धतिः तथा विविधगाणितिकतत्त्वपद्धतिः च प्रयोगे प्राचीनभारतवर्षस्य अवदानं स्वीकार्यम् ।

**गणितशास्त्रं, SI परिमाणं च** – वर्तमाने सर्वेषु देशेषु गणितशास्त्रं प्रचारितम् । परन्तु प्राचीनकाले जनाः गणितशास्त्रे उन्नताः आसन्, एतस्य प्रमाणं विभिन्नेषु ग्रन्थेषु मिलति । पिथागोरासमहोदयस्य उपपाद्यस्य धारणा बौधायनस्य शुल्वसूत्रे मिलति – समकोणीत्रिभुजस्य अतिभुज$^2$ = भूमि$^2$+लम्ब$^2$ इति विवृतः आसीत् । आर्यभट्टमहोदयेन त्रिभुजस्य क्षेत्रफलनिर्णयस्य एकः नियमः आविष्कारः क्रियते – "त्रिभुजस्य बाहुत्रयम् a,b,c भवति चेत्, d (अर्धपरिसीमा) = (a + b +c)/2 अतः त्रिभुजस्य क्षेत्रफलम् – $\sqrt{D(D-A)(D-B)(D-C)}$ वर्गः एककः । चतुर्दशशतके सायणः 'आलोकस्यगतिः अर्धनिमेषे 2202 योजनमिति' गणनां कृतवान् । अस्य आलोकस्य गतिविषयस्य गणना ऋग्वेदेऽपि मिलति – "योजनानां सहस्रद्वे द्वेशते द्वेच एकेन निमिषार्धेन क्रमेण नमोस्तुते ।" आधुनिककाले योजनः निमेषः वा SI unit सम्पर्कितः निम्नलिखितपद्धति माध्यमेन दृश्यते –

1 yojana = 4 kosa.
4 kosa = 8000 British yards.
1 British yards = 0.9144 Meters.

अतः 2202 Yojana = 2202*4*8000*0.9144 = 6443228.16 meters श्रीमद्भागवद्गीतायां निमेषस्य समुचिता वर्णना अस्ति ।

15 Nimeshas = 1 kashta.
15 kashta = 1 laghu.
30 laghus = 1 muhurta.
30 muhurta = 1 diva-ratri (24 hours)

**विनोदनम्** – वर्तमाने कर्मजीवनस्य ग्लानिदूरीकरणार्थं जनाः अवसरकाले विनोदनं कुर्वन्ति । अयं विनोदनं गीतवाद्यनृत्यनाट्याभिनयैः जायते । गीतं गान्धर्वविद्या अभिनयः च प्राचीनकाले तथा वैदिककालेऽपि जनानां प्रियम् आसीत् । प्राचीनसामगीतं भारतीयसङ्गीतानाम् उत्सः । वर्तमाने सङ्गीतचर्चायाः सप्तस्वराः प्राग्कालेऽपि चर्चयति । सा, रे, गा, मा, पा, धा, नि इमे सप्तस्वराः सप्तऋषीनां नामानुसारेण प्रचलितः स्म ।

"निषादर्षभगान्धार षड्जमध्यमधैवताः।
पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थताः स्वराः ।।"
(महाश्वेता वर्णनम् p.51)

भारतीयचलच्चित्रं भरतस्यनाट्यशास्त्रानुसारेण निर्माणं भवति।

**सर्वभाषासु उन्नतभाषाः** – सर्वभाषासु संस्कृतम् उन्नतभाषा । द्विशतवत्सरपूर्वे उइलियमजोनसः उक्तवान् – "Sanskrit is more perfect then Greek, more copious then Latin, and more exquisitely refind then other. अपिच NASA (National Aeronautics Space Administration) गवेषणामाध्यमेन तथ्यम् उद्घाटयति, संस्कृतं समग्रविश्वे सर्वासु भाषासु उपयुक्ता विज्ञानसम्मता भाषा । संस्कृतभाषा संगणकयन्त्रस्य उपयुक्तभाषा अपि च देवनागरीलिपिः सहजगम्या सुवोध्या वा ।

**रूपचर्चा** –रूपचर्चा वर्तमाने जनानां दैनन्दिनजीवनेन सह सम्पर्कितः । इदानींकाले (Beauty Parlor) विविधैः पद्धतिभिः रूपचर्चायाः तुल्य दैहिकसौन्दर्यचर्चाङ्गसंवाहनवस्त्रकेशालंकारादिविन्यासा-प्रसाधनप्रयोगशरीरसंस्काराणां विविधानि कौशलानि च प्राचीनकाले उपलभ्यन्ते । वर्तमाने पक्ककेशेषु जनैः कृष्णमसी व्यवहृयते, परन्तु इयं कृष्णमसी प्राचीनकालेऽपि निर्माणं जातम् । नावनीतकपुस्तके कृष्णमसीप्रस्तुतप्रणाली अपिच शार्ङ्गधरविरचितः शार्ङ्गधरपद्धतिपुस्तके कृष्णमसी, सुगन्धितैलं च एतयोः प्रस्तुतप्रणाली अस्ति ।

**असर्वकारीयसंस्थासु म्यानेजम्यान्टपद्धतिः** – अधुना वाणिज्यक्षेत्रे chain marketing पद्धतिः दृश्यते । परन्तु इयं धारणा 1000 वत्सरपूर्वेऽपि आसीत् –

"आचार्यात् पादमादन्ते पादं शिष्यः स्वमेधया ।
पादं सब्रह्मचारिभ्यो पादं कालक्रमेण च ।।"

दक्षः दलपतिः तथा गोष्ठीपतिः एकायाः संस्थायाः/देशस्य उन्नतिक्षेत्रे गुरूत्वपूर्णा भूमिका पालयति । परन्तु कः दक्षः दलपतिः गोष्ठीपतिः वा ? श्रीमदभग्वदगीतायाः चतुर्दशाध्याये चतुर्विंशतिः पञ्चविंशतिः श्लोके च अस्ति -

"समदुःखसुखः स्वस्थः समलोष्टाश्मकांचनः।
तुल्यप्रियाप्रियो धीरः तुल्यनिन्दात्मसंस्तुतिः ।।
मानापमानयोस्तुल्यः तुल्यो मित्रारिपक्षयोः।
सर्वारम्भपरित्यागी गुणातीतः स उच्यते ।।"
(गीता 14/25-25)

**योगासनम्** – वर्तमानकर्मचञ्चलजीवने सुस्थजीवनयापनार्थं तथा मानसिकसुस्थता रक्षणार्थं योगासनम् एका उन्नता पन्था । इदानीं शिक्षिताः जनाः सुस्थाय निरोगाय प्रतिदिनं योगासनं कुर्वन्ति । प्रवासीजनाः अत्र आगत्वा योगासनं शिक्ष्यन्ति । योगासनेन प्रकृतिमनुष्ययोः सम्पर्कः निविडः भवति । अपिच देहमनसी, चिन्ता, कर्म च एकत्रितः भवति । वर्तमाने 21 June विश्वयोगदिवसः पालितः । परन्तु एतत् योगासनं प्राचीनकाले भारतीयृषिभिः सृष्टिः क्रियन्ते।

**वीर्यकोशः** – इदानींकाले यदि कोऽपि पुरुषः सन्तानोत्पादने असमर्थः तर्हि Sperm Bank वीर्यकोशः वा सहायता करोति । परन्तु प्राचीनकालेऽपि एका पद्धतिः आसीत् । यथा नियोगप्रथा माध्यमेन सन्तानोत्पादनप्रचलनं वैधः आसीत् । मनुसंहितायाम् अपि उल्लिखितम् -

"देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया ।
प्रजेप्सिताधिगन्तव्या सन्तानस्य परिक्षये ।।" (मनुसंहिता 9/59)

अतः यदि कोऽपि पुरुषः सन्तानोत्पादने अक्षमः, तर्हि तस्य स्त्री अनुमतिक्रमेण पतेरनुजेन वा सपिण्डपुरुषेण सन्तानलाभं कर्तुं शक्नोति । महाभारतेऽपि अस्य उल्लेखः अस्ति । अम्बिकाम्वलिकयोः पतिर्मृत्युकाले सत्यवत्यादेशानुसारेण व्यासदेवः तयोः गर्भे धृतराष्ट्रपाण्डूउत्पादयति ।

**चिकित्साविज्ञानम्** – प्राचीनभारते चिकित्साशास्त्रम् इति ज्ञानार्थे आयुर्वेदचिकित्साशास्त्रम् अन्यतमम् आसीत् । एतत् चिकित्साविज्ञानं प्राचीनभारते स्वतन्त्ररूपेण विराजते । संस्कृतायुर्वेदशव्दस्यार्थः – life knowledge. ऋग्वेदे देवानां वैद्यरूपेण अश्विनीरुद्रयोः उल्लेखः आसीत् । अश्विनीभ्याम् ऋषिच्यवनः वृद्धात्मुक्तः तथा यौवनं प्राप्यति स्म । आयुर्वेदस्य व्यवहारः अथर्ववेदे तथा तस्मिन् समये अतीव दृश्यते । समग्र आयुर्वेदशास्त्रं परवर्तिकाले अष्टासु विभागेषु विभज्यते –

1) शल्यतन्त्रः (major surgery)
2) शालाक्यतन्त्रः (minor surgery)
3) कायचिकित्सा (therapeutics)
4) भूतविद्या (demonology)
5) कुमारभृत्यः (paediatrics)
6) अगदतन्त्रः (toxicology)
7) रसायनः (elixir)
8) वाजीकरणम् (aphrodisiacs)

1948 ख्रीष्टाव्दे विश्वस्वास्थसंस्था (WHO) स्वास्थ्यस्य संज्ञा निरूपिता –"Health is a state of complete physical, mental, and social well being and not merely the absence of disease or infirmity". इयं धारणा प्राचीनग्रन्थसुश्रुतसंहितायामपि अस्ति –

"समदोषः समाग्निश्च समधातुमलक्रियाः।
प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्याभिः धीयते ।।"

अधुना एकविंशशतकेऽपि आयुर्वेदचिकित्सा तथा आयुर्वेदौषधं विश्वेजनानां रोगनिरामये उत्कृष्टा पन्था । चरकः सुश्रुतश्च प्राचीनकालस्य आयुर्वेदज्ञः आसीत् अपिच राज्ञः विम्विसारस्य चिकित्सकः जीवकः एकः शल्यचिकित्सकः आसीत् । इदानीं काले पतञ्जल्यौषधम् अतीव प्रचलितम् । सः पतञ्जलिः औषधे लौहंपारदादिमिश्रनेन औषधं प्रस्तुतं कृतवान् । इदानीं कालेऽपि औषधे लौहं मिश्रयति ।

**सुस्थसमाजगठनायसंस्कृतस्यउपदेशाः** – वर्तमाने सुस्थजीवनयापनाय विभिन्नोपदेशाः अतीव गुरुत्वपूर्णाः, ये उपदेशाः संस्कृतसाहित्येषु उपलभ्यन्ते - शिशूनाम् अशिक्षा शिशुश्रमश्च भारतवर्षस्य तथा विश्वस्य समस्या । अधुना समग्रे भारतवर्षे षष्टिप्रयुतः शिशुश्रमिकाः, विश्वस्य एकादशप्रतिशतम् (en.m.wikipedia.org/wiki/childlabor. in) तथा समग्रविश्वे 250 – 304 प्रयुतः शिशुश्रमिकाः विद्यन्ते । (en.m.wikipedia.org/wiki/child labor. in) । ते कदापि विद्यालये न गच्छन्ति, मातापितरौ सन्तानं विद्यालयस्य परिवर्ते कर्मक्षेत्रे प्रेषयतः । अस्मिन् विषये हितोपदेशग्रन्थे उपदेशः मिलति –

"माताशत्रुः पितावैरी येन बालो न पाठितः" (हितो–मित्रलाभः -38)।
यः सन्तानं न पाठयति, सः सन्तानस्य शत्रु इति उच्यते ।

अस्मिन् पितृतान्त्रिके समाजे नारीद्वितीयश्रेणी इति मन्यते । कन्यासन्तानः सर्वदा अवहेलिता, भारतवर्षे लिङ्गवैषम्यः एका समस्या । वर्तमाने कन्यानां पुत्राणां च अनुपातः उद्वेलनीयः - 1000:940 (www.cencuse 2011.co.in) शिक्षिताः जनाः शिशोः जन्मनः पूर्वे आलट्रासनोग्राफी द्वारा लिङ्गनिर्णयं कृत्वा कण्यासन्तानं हत्वा कुर्वन्ति, भारतसरकारेण आलट्रासनोग्राफी निषिध्यते, तथापि नियमम् उलङ्घनं कृत्वा प्रचलति । परन्तु मनुना मनुसंहितायां कन्यासन्तानं पुत्रसम इति मन्यते –

"यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा" (मनुसंहिता- 9/130)।

जनाः तेषां जीवने उच्चाकांक्षार्थं बहवः शोचयन्ति, परन्तु तत् पूरणार्थम् उपयुक्तपरिश्रमं न कृत्वा परिवर्ते whatsapp, facebook. प्रभृतिः कुर्वन्ति, अस्मिन् विषये हितोपदेशे उपदेशः मिलति–

"उद्यमेन हि सिद्धन्ति कार्य्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ।।"(हितो- मित्रलाभः -36)

सिंहः वनस्य नृपः तथापि सः शिकारं करोति, अतः अस्यां पृथिव्यां परिश्रमं विना किमपि न सम्भवति ।

इदानीं परिवारेषु पतिपत्न्योः विच्छेदः एका समस्या । अनेन विच्छेदेन संसारे कल्याणं न भवति, तेषां सन्तानः अशान्तिग्रस्तः जातः, शिशुः मातापित्रोः स्नेहात् वञ्चितः । फलतः तेषां सम्यक् विकाशाय इयं घटना प्रधानवाधा स्वरुपा । अयं विच्छेदः केन प्रकारेण बन्धः भवति, तथा एकश्रीवृद्धिकारीपरिवारः परिगण्यते । मनुः तस्य मनुसंहितायाम् उक्तवान् –

"सन्तुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च ।
यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम् ।।" (मनुसंहिता 3/60)

यस्यिन् वंशे पतिः पत्नी च उभौ परस्परं परस्परेण प्रीतः भवति, अस्मिन् परिवारे सर्वप्रकारं कल्याणं विद्यते ।

अधुना विश्वे आत्महत्यायाः वृद्धिः भवति । समग्रविश्वे आत्महत्यात्यगेन भारतवर्षस्य स्थानं प्रथमम् । परारि वत्सरे अस्मिन् देशे1,35,445 जनैः आत्महत्या क्रियन्ते (en. m.wikipedia.org/wiki/ Suicide .in/India) तथा समग्रविश्वे प्रायशः 800000 जनाः आत्महत्या कुर्वन्ति स्म । अप्राप्त्याः वेदना, प्रियजनस्य मृत्युः, समस्यासमाधाने व्यर्थता च प्रभृतिभिः कारणैः जनः आत्महत्या करोति । अस्मिन् विषये गीतायाम् उपदेशः मिलति –

"कर्म्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्म्मफलहेतुर्भूर्म्मा ते सङ्गोऽस्त्वकर्म्मणि ।।"
(श्रीमद्भगवदगीता 2/47)

**उपसंहारः** – भारतवर्षे संस्कृतस्य प्रयोजनीयता युगे युगे स्थास्यति । परन्तु केचन जनाः येषां किमपि कर्म नास्ति, ते संस्कृतस्य निन्दा अपवादः वा कुर्वन्ति, संस्कृतस्य पठनेन समाजस्य उन्नतिः न भवति, कोऽपि उद्योगः न मिलति । परन्तु समाजे सर्वत्र संस्कृतस्य उपस्थितिः लक्ष्यते । यथा - अधुनाऽपि विभिन्नसंस्थायां संकृतस्य श्लोकः कथा वा मिलति । उदाहरणस्वरुपाः - LICI संस्थायां "योगक्षेमंवहाम्यहम्" । सर्वभारतीयदूरभाषः संस्थायां "बहुजनहिताय बहुजनसुखाय" । DRDA संस्थायां "वलस्य मूलं विज्ञानम्" । अस्माकं देशस्य गनतन्त्रस्य रक्षास्थानं तथा सर्वोच्चोन्यायालयेऽपि संकृतस्य उद्धृतिरस्ति "यतो धर्मस्ततो जयः" । भारतीयनौवाहिन्यां "शं नो वरुणः" । दूरदर्शने अस्ति महान् वाक्यम् "सत्यं शिवं सुन्दरम्" । अस्माकं देशस्य वृहत्मुक्तविश्वविद्यालये मनुसंहितायाः एकं वाक्यम् अस्ति "अन्नाद् भवन्ति भूतानि" । भारतीयवायुसेनासंस्थायां "नभः स्पृशं दीप्तम्" । Bureau of Indian Standards संस्थायाम् "मानकः पथप्रदर्शकः" । IIM संस्थायां "विद्या विनियोगाद्विकासः" । RPF वाहिन्यां "यशो लभस्य" । All India Institute of Medical Science अत्रापि संस्कृतस्य महान् कथाम् अस्ति "शरीरमाद्यं खलु धर्मसाधनम्" । Customs and Central Excise अत्र "देशसेवार्थ करसंचय" । विद्यालय-विश्वविद्यालयेषु "तमसो मा जोति र्गमय" वाक्यं दृश्यते परन्तु अधिक संख्यकाः छात्राः एतस्य अर्थः न जानन्ति, कुतः नीतवान् एतदपि न जानन्ति । वयं भारतीयाः, परन्तु "सत्यमेव जयते" एतस्य अर्थः न जानीमः, कस्मिन् उपनिषदि अस्ति एतदपि न जानीमः, एतत् लज्जनीय विषयम् । एतस्य मूले एकं कारणं संस्कृते अज्ञनता । अतः अधुनापि संस्कृतस्य प्रयोजनीयता अस्ति ।

**References**


1. दासः देवकुमारः. *History of Sanskrit Literature*. सदेशः. कलिकाता. 1415 वङ्गाव्दः सप्तसंस्करणम् (प्रथमसंस्करणम् 1404 वङ्गाव्दः).
2. मनुसंहिता. मनुः. सम्पादकः अनुवादकश्च मानवेन्दुः वन्द्योपाध्यायः. संस्कृतपुस्तकभाण्डारः. कलिकाता. 1419 वङ्गाव्दः तृतीयसंस्करणम् (प्रथमसंसकरणम् 1410 वङ्गाव्दः).
3. महाश्वेता वर्णनम्. वाणभट्टः. सम्पादकः अशोककुमारवन्द्योपाध्यायः. सदेशः. कलिकाता. 1417.
4. वन्द्योपाध्यायः, धीरेन्द्रनाथः. *History of Sanskrit Literature*. West Bengal State BookBoard. Kolkata. द्वितीयसंस्करणस्य तृतीयमुद्रणम् 2009/c. (प्रथमसंस्करणम् 1988/a).
5. श्रीमद्भगवदगीता. अनुवादकः श्रीयुक्तभूतनाथसप्ततीर्थः, सम्पादकः श्रीयुक्तनलिनीकान्तव्रह्मः. नवभारतपावलिशार्सः. कोलकाता. 2006 पुनर्मुद्रणम् (1393 वङ्गाव्दः प्रथमसंस्करणम्)।
6. हितोपदेशमः. नारायणशर्माः. Ramkrishna mission institute of culture. कोलकाता. call no – 891.28/हितो/s ।
7. B. Mahadevan. *Relevance of Sanskrit in contemporary society*. 10 august, 2013